M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 749

Title: Bhavani Paddhati

749

भवानी पद्धतिः

Bhavāni Paddhati	Title
	Author
	Editor
Sam. 1767	Year. Vols.
	Publisher
749	Remarks

॥श्री भवानीपदनिध्यायिनः॥पुस्तकं॥

॥व्रजनाथभट्टतत्सुत॥लजेगोविंदभट्टस्येदं॥

ना.प. श्रीगणेशाय नमः। ब्राह्मे मुहूर्ते शयनतलादुत्थाय करचरणे प्रक्षाल्य निजासने समुपविश्य। स्व
१ शिरसि श्वेतवर्णाधोमुखसहस्रदलकमलांतर्गतचंद्रमंडलोपरि। स्वगुरुं शुक्लवर्णं च शुक्लालंकारभू
षितं। ज्ञानानंदमुदितमानसं चतुर्भुजं त्रिनयनं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्तधृत
कमलया रक्तवस्त्राभरणया स्वप्रियया दक्षभुजेनालिंगितं सर्वदेवदेवं सर्वतीर्थतीर्थं सर्वमंगलमं
गलं परमशिवस्वरूपं ध्यात्वा। तच्चरणकमलयुगविगलदमृतधारया स्वात्मानं प्लुतं विभाव्य। मा
६ नसोपचारैराराध्य ॐ ऐं ह्रीं श्रीं हसफ्रें हसचांवरयऊं सहखफ्रें सुहें ज्ञमलवरयूं ह्सौः स्हौः श्री
१४ मच्छ्री अमुकानंदनाथपादुकां श्रीदेव्यंबा श्रीपादुकां च पूजयामि नमः [...] इति दशविमृश्य दंडप्रणा
मं मनसा कुर्यात्। तत्र प्रणाममंत्रो यथा। ॐ नमामि सद्गुरुं शांतं प्रत्यक्षं शिवरूपिणं। शिरसा योगपी
ठस्थं मुक्तिकामार्थसिद्धये। श्रीगुरुं परमानंदं वंदाम्यानंदविग्रहं। यस्य सान्निध्यमात्रेण चिदान
दायते परं।२। अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।३।

अखंडमंडलाकारं व्याप्तं येन चराचरं। तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।४। गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः सा
क्षान्महेश्वरः। गुरुरेव जगत्सर्वं तस्मै श्रीगुरवे नमः।५। इति प्रणाममंत्रान्पठित्वा न्यांश्च पठेत्। नमस्ते नाथ भग
वन् शिवाय गुरुरूपिणे। विद्यावतारसंसिद्धै स्वीकृतानेकविग्रह।१। नवाय नवरूपाय परमार्थैकरूपि
णे। सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते।२। स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने। परतंत्राय भक्तानां भव्या
नां भव्यरूपिणे।३। ज्ञानिनां ज्ञानरूपाय प्रकाशाय प्रकाशिनां। विवेकिनां विवेकाय विमर्शाय विमर्शि
नां।४। पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः। सदा मच्चित्तरूपेण विधेहि भवदासनं।५। इति श्रीगु
रुं प्रणम्य सुप्रसन्नं विभाव्य। मनसा तदाज्ञां गृहीत्वा। मूलाधारे स्वर्णवर्णचतुर्दलकमलकर्णिकांतर्गत
त्रिकोणचक्रशृंगाटकोपरि परां शक्तिं कुंडलिनीमुद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां स
कलमंत्रमातरं सर्वप्राणिजीवं त्रिधाम धामानं पंचाशद्वर्णविग्रहां अष्टत्रिंशत्कलारूपिणीं सर्पाका
रां मूर्ध्वमुखीं सार्द्धत्रिवलयां बिसतंतुतनीयसीं सुप्तां विभाव्य। गुरूपदिष्टनिजसद्ज्ञानादेन प्रबो
धयित्वा। तत्र वं नमः शं नमः षं० सं० इति मंत्रैः पत्रेषु सर्वत्र प्रादक्षिण्येन प्रपूज्य मध्ये मूलेन च प्र

भवानी·प० २

ॐ६

पूज्य·सर्वत्र हंसइतिमंत्रेणोत्थाप्य·ततः स्वाधिष्ठाने लिंगमूले विद्रुमवर्णे षड्दलकमले तां नीत्वा तत्र। बं न
मः। भं·मं·यं·रं·लं नमः। इतिप्रतिमंत्रं प्रपूज्य। मध्ये मूलेन च प्रपूज्य। ततो मणिपूरके नाभौ नीलवर्णे दशदलक
मले तां नीत्वा। तत्र डं नमः। ढं·। णं·। तं·। थं·। दं·। धं·। नं·। पं·। फं·। इतिप्रतिपत्रं पूजयित्वा। मध्ये मूलेन च प्रपूज्य।।
ततोऽनाहते पिंगलवर्णे वक्षसि द्वादशदलकमले तां नीत्वा। तत्र·कं नमः। खं·। गं·। घं·। ङं·। चं·। छं·। जं·। झं·। ञं·।
टं·। ठं·। नमः। इतिप्रतिपत्रं। मध्ये मूलेन च प्रपूज्य। ततो विशुद्धौ कंठे धूम्रवर्णे षोडशदलकमले तां नीत्वा तत्र अं नमः।
आं·इं·ईं·उं·ऊं·ऋं·ॠं·लृं·लॄं·एं·ऐं·ओं·औं·अं·अः नमः इति पत्रेषु मध्ये मूलेन च प्रपूज्य। तत आज्ञा
चक्रे भ्रूमध्ये विद्युद्वर्णे द्विदलकमले तां नीत्वा तत्र हं नमः क्षं नमः इति पत्रयोर्मध्ये मूलेन च संपूज्य। ततो
ब्रह्मरंध्रे सहस्रदलकमलां कमलकर्णिकांतर्गत चंद्रमंडलोपरि बिंदुरूप तेजोमय परशिवेन सह
तां संयोज्य तेनामृतेन ततः स्वदेवतां संतर्प्य तत्र मुहूर्तमेकं लयं विभाव्य। अवारोहे सोहमिति मंत्रेण
सर्वत्रावरोह्य·ततोऽमृतस्रवंमार्गेण सुषुम्णांतर्गतेन तत्तदधिदेवतास्तत्तच्चक्रेषु स्नावयंती। तेषु तेषु क
मलेषु तैस्तैरुपचारैः संपूज्यमाना हृदि स्वदेवतां संतर्पयंती कुंडलिनी स्वस्थाने मूलाधारे स्थापयेत्।

इत्थमारोहावरोहक्रमेण कुंडलिनीं देवीं ध्यात्वा प्राणायामं कुर्यात्। प्रणवं षोडशवारमुच्चरन् दक्षि
णांगुष्ठेन दक्षिणनासारंध्रं निरुध्य वामेन पवनं पूरयेत्। ततस्तमेव प्रणवं चतुःषष्टिवारमुच्चर
न् दक्षानामाकनिष्ठाभ्यां वामपुटं च निरुध्य द्वाभ्यां नासारंध्राभ्यां पवनं कुंभयेत्। प्रणवं द्वात्रिंशद्वा
रमुच्चरन् वामनासारंध्रं तथैव निरुध्य दक्षिणेन पवनं रेचयेत् इति प्राणायामः। ततः ऋष्यादि
न्यासमारभेत्। ॐ अस्य श्रीत्रिपुरभैरवीभवानीमंत्रस्य सदाशिव ऋषिः। अनुष्टुप् छंदः। श्रीत्रिपुर
भैरवीभवानी देवता। ह्रीं बीजं चंडी शक्तिः क्लीं कीलकं। मम श्रीधर्मार्थकाममोक्षार्थे जपे विनियो
गः। इति कृतांजलिः स्मृत्वा। यथाविधि विन्यसेत्। सदाशिव ऋषये नमः शिरसि। अनुष्टुप् छंदसे
नमो मुखे। श्रीत्रिपुरभैरवीभवानीदेवतायै नमः हृदि। ह्रीं बीजाय नमः गुह्ये। चंडी शक्तये नमः पादयोः।
क्लीं कीलकाय नमः नाभौ। मम श्री धर्मार्थकाममोक्षार्थे जपे विनियोगः। इति सर्वांगेषु। ततः करन्या
सः ॐ ॐ अंगुष्ठाभ्यां नमः। ॐ श्रीं तर्जनीभ्यां स्वाहा। ॐ ह्रीं मध्यमाभ्यां वषट्। ॐ क्लीं अनामिका
भ्यां हुं। ॐ स्वौं कनिष्ठिकाभ्यां वौषट्। ॐ ह्रां करतलकरपृष्ठाभ्यां फट्। इति करन्यासः। अथ षडंग

ग्रा.नीप. ३

न्यासः।ॐ ह्रं हृदयायनमः।ॐ श्रीं शिरसेस्वाहा।ॐ ह्रीं शिखायैवषट्।ॐ क्लीं कवचायहुं।ॐ स्वं
नेत्रत्रयायवौषट्।ॐ हां अस्त्रायफट्।इतिषडंगंविन्यस्यनिजहृदयकमलेदेवींध्यायेत्।ॐ ना
भेरधस्तान्नीलाभामुपरिश्यामलाकृतिं।अग्रेरक्तारविंदाभांचतुर्भुजसमन्वितां।ग्रैवेयांगदसं
युक्तांलसत्कांचीकलापिनीं।खड्गशक्तिधरांदेवींवरदाभयपाणिकां।त्रेतसस्यांमहारौद्रींभुज
गेनोपवीतिनीम्।भवानीकालसंहारबद्धमुद्राविभूषितां।जगत्स्थितिकरींब्रह्मविष्णुरुद्रादिभिः ८५
सुरैः।स्तुतांतांपरमेशानींनौम्यहंविघ्नहारिणीम्।इतिध्यात्वामानसोपचारैराराध्यमालामादाय
यथाशक्तिजपंविधाय।पुनरपिप्राणायामऋष्यादिकरषडंगन्यासान्कृत्वा।ॐ गुह्यातिगु
ह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं।सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि।आवाहनंनजाना
मिनैवजानामिपूजनं।विसर्जनंनजानामिक्षमस्वपरमेश्वरि।यदक्षरपरिभ्रष्टंमात्राहीनंचय
द्भतं।तत्सर्वंक्षमयादेविदक्षमस्वानुग्रहंकुरु।इतितेजोमयंजपफलंदेवीवामहस्तेसमर्प्यनिज ३
हृत्यंसमर्प्पयेत्।प्रातःप्रभृतिसायांतंसायादिप्रातरंततः।यत्करोमिजगद्योनेतदस्तुतवपूज

नं।इतिसमर्प्यस्वका(पी)नुष्ठानायदेव्याआज्ञांप्रार्थयेत्।त्रैलोक्यचैतन्यमयेसुरेशिश्रीसुंदरित्वच्चरणा
ज्ञयैव।प्रातःसमुत्थायतवप्रियार्थंसंसारयात्रामनुवर्तयिष्ये।संसारयात्रामनुवर्तमानंत्वदाज्ञया ८२
श्रीत्रिपुरेसुरेशि।स्पर्द्धातिरस्कारकलिप्रमादभयानिमामाभिभवंतुमातः।जानामिधर्मंनचमेप्र
वृत्तिर्जानाम्यधर्मंनचमेनिवृत्तिः।त्वयाहृषीकेशिहृदिस्थयाहंयथानियुक्तोस्मितथाकरोमि॥
इतिदेव्याज्ञांप्रार्थयित्वागुरूपदेशेनज्ञातंसहजसिद्धमजपाजपंतत्तद्देवताभ्यःसंकल्पसमर्प्पये
त्।अथपूर्वेद्युरहोरात्राचरितमुच्छ्वासनिश्वासात्मकंषट्शताधिकमेकविंशतिसहस्रसंख्याक
मजपाजपंमूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाब्रह्मरंध्रेषुचतुर्दलषट्दलदशद
लद्वादशदलषोडशदलद्विदलसहस्रदलेषुस्वर्णविद्रुमनीलपिंगलधूम्रविद्युत्कर्बुरवर्णेषुस्थि
तेभ्यःगणपतिब्रह्मविष्णुरुद्रजीवात्मश्रीगुरुपादुकाभ्योयथाभागशःसमर्पयिष्यामीतिकृ
तांजलिःसंकल्पसमर्प्पयेत्।तद्यथा।ॐ ऐं ह्रीं श्रीं मूलाधारचक्रस्थायगणपतयेअजपाजपानां

को १

वनी·प·
४

षट्‌शतानि समर्पयामि नमः। ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां षट्‌स
हस्राणि समर्पयामि नमः। मणिपूरचक्रस्थाय विष्णवे अजपाजपानां षट्‌सहस्राणि समर्पयामि
नमः।४। अनाहतचक्रस्थाय रुद्राय अजपाजपानां षट्‌सहस्राणि समर्पयामि नमः।४। विशुद्धि
चक्रस्थाय जीवात्मनेऽजपाजपानां सहस्रं समर्पयामि नमः।४। आज्ञाचक्रस्थाय परमात्म
नेऽजपाजपानां सहस्रं समर्पयामि नमः। ॐ ऐं ह्रीं श्रीं सहस्रदलकमलकर्णिकामध्यस्थायै
श्रीगुरुपादुकायै अजपाजपानां सहस्रं समर्पयामि नमः इति समर्पयेत्। एतावत्कर्तुमशक्त
श्चेत्। ॐ ऐं ह्रीं श्रीं अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिश्वासात्मकं षट्‌शताधिकमेकविं
शतिसहस्रसंख्याकमजपाजपं ब्रह्मस्थसहस्रदलकमलकर्णिकामध्यवर्तिन्यै श्रीगुरुपा
दुकायै समर्पयामि नमः। इति गुरवे वा समर्पयेत्। इत्यजपाजपं समर्प्य। ॐ अद्यसूर्योदयमा
रभ्य अहोरात्रेणोच्छ्वासनिश्वासात्मकं षट्‌शताधिकमेकविंशतिसहस्रसंख्याकं अजपाज ४

पमहं करिष्ये इति कृतांजलिपुटः संकल्प्य अजपामंत्रेण प्राणायामत्रयं कृत्वा स्वशिरसि
ॐ ऐं ह्रीं श्रीं हंसात्मने ऋषये नमः मुखे।४ अव्यक्ताय गायत्रीछंदसे नमः हृदये।४ परमहंसा
य देवतायै नमः गुह्ये।४ हं बीजाय नमः पादयोः।४ सः शक्तये नमः नाभौ।४ सोहं कीलकाय न
मः हृदये।४ ॐकारतत्वाय नमः मूर्ध्नि।४ नमस्ते स्थानाय नमः सर्वांगे।४ हेमवर्णाय नमः कंठे
४ उदात्तस्वराय नमः इति विन्यस्य मम मोक्षार्थे जपे विनियोगः इति कृतांजलिर्वदेत्। त
तः अंगुष्ठयोः। ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने स्वाहा नमः तर्जन्योः।४ ह्रीं सोमात्मने स्वाहा मध्य
मयोः।४ ह्रूं निरंजनात्मने वषट् अनामिकयोः।४ ह्रैं निराभासात्मने हुं कनिष्ठयोः।४ ह्रौं अतनुसूक्ष्मा
देवी प्रचोदयात् स्वाहा [illegible] वौषट् करतलपृष्ठयोः।४ ह्रः अव्यक्तबोधात्मने स्वाहा फट्।
अथ षडंगः। ॐ ऐं ह्रीं श्रीं ह्रां सूर्यात्मने स्वाहा हृदयाय नमः।४ ह्रीं सोमात्मने शिरसे स्वाहा।४ ह्रूं
निरंजनात्मने शिखायै वषट्।४ ह्रैं निराभासात्मने कवचाय हुं।४ ह्रौं अनंततनुः सूक्ष्मा देवी प्रचोदया

भवानी·प·
५
८४

स्वाहा नेत्रत्रयाय वौषट्॥४ ह्रः अव्यक्तबोधात्मने ह्रीं कवचाय वषट् स्वाहा अस्त्राय फट्॥
इति विन्यस्य ध्यानं कुर्यात्॥ तद्यथा॥ द्यां मूर्द्धानं यस्य विप्रा वदन्ति खं नाभिं चन्द्रसूर्यौ च नेत्रे। दि-
शः श्रोत्रं यस्य पादौ क्षितिश्च ध्यातव्योसौ सर्वभूतान्तरात्मा॥ इति विराट्स्वरूपं स्वात्मानं
ध्यात्वा तदनु संधाय ग्रीवां वायोर्निगमप्रवेशात्मकमजपामंत्रं हंसः पदं पंचविंशतिवारं
जप्त्वा समर्प्य गुरूपदिष्टमार्गेण नादानुसंधानपूर्वकं निरस्तसमस्तोपाधिनाऽकेनापि
चिद्विलासेन प्रवर्तमानोऽस्मीति विभाव्य स्वकार्यानुष्ठानाय समुद्रमेखले देवि पर्वतस्तन-
मंडले। विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥ इति भूमिं प्रार्थ्य। श्वासानुसारेण तस्यां पा-
दं निधाय बहिरागत्य। मलमूत्रोत्सर्गशौचाचमनदंतधावनादिकं विधाय नदीं गत्वा दे- दी३
वीरूपं सर्वं विभाव्य। मूलं स्मरन्मलापकर्षणस्नानं विधाय वैदिकं स्नानं विधायाचम्य तां-
त्रिकस्नानं कुर्यात्॥ ॐ अद्यामुकमास्यमुकपक्षस्यामुकतिथौ श्रीपरमदेवताप्रीत्य- ५

र्थं स्नानमहं करिष्ये। इति जलमुष्टिना संकल्पं कृत्वा जले चतुष्कोणचक्रं लिखित्वा सूर्यमंड-
लादंकुशमुद्रया ॐ गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिंधु कावेरि जलेऽस्मिन्संनि- पू॰ले
धिं कुरु। इति तीर्थमावाह्य पुरः कल्पिततीर्थसंयोज्य मूलांते आत्मतत्त्वाय स्वाहा। मूं॰ वि-
द्यातत्त्वाय। मू॰ शिवतत्त्वाय॰ इति त्रिराचम्य। आत्मानं प्रोक्ष्य मूलेन मृत्तिकया स्नपनं कृ-
त्वा मूलं पठन्कुंभमुद्रया हृदयादावाहितां परदेवतां त्रिर्जलैरभिषिंच्य। अंगुलिभिः श्रव-
णादीनि सप्तच्छिद्राणि निरुध्य त्रिर्निमज्योन्मज्जेत्॥ ॥इति स्नानविधिः॥ अथ संध्या-
प्रयोगः। तत्र नदीतीरमारुह्य धौते वस्त्रे परिधाय पूर्ववदाचम्य प्राणायामऋष्यादि-
करषडंगन्यासान्विधाय। वामहस्ते जलं निधाय दक्षहस्तेनाच्छाद्य लं वं रं यं हं इति त्रि-
रभिमंत्र्य मूलमुच्चरन्गलितोदकबिंदुभिर्दक्षांगुष्ठानामिकाभ्यां मूर्द्धि सप्तधाभ्युक्षणं

भवानीप
६

कृत्वा शेषं जलं दक्षहस्ते निधाय तेजोरूपं ध्यात्वा । इडया देहांतः पापं प्रक्षाल्य कृष्णवर्णं त
ज्जलं पिंगलया विरेच्य पुरः कल्पितवज्रशिलायां फडित्यस्त्रमंत्रेण निक्षिपेत् । ततो मन
सा दूर्वाक्षतरक्तचंदनयवपुष्पादिनार्घ्यं विधाय । ॐ ह्रां ह्रीं हंसः श्रीमार्तंडभैरवाय प्रका
शशक्तिसहिताय इदमर्घ्यं स्वाहा । इति त्रिरर्घ्यं कुलसूर्याय दत्वा । सूर्यमंडले हृत्क
मलान्मूलदेवीं नीत्वा तत्र विधिना ध्यात्वा मानसोपचारेण संपूज्य । ॐ सुभगायै विद्म
हे कात्यायन्यै धीमहि । तन्नो भवानी प्रचोदयात् । इत्यनया मूलगायत्र्या च तसृषु संध्या
सु मूलदेव्यै त्रिरर्घ्यं दत्वा दशधा प्रजपेत् । ततश्च तसृषु संध्यासु क्रमशः मूलाधारहृत्प
कजभ्रूमध्यब्रह्मरंध्रे देवीं तेजःसमाकृष्य इडया विरेच्य । कल्पितवह्निसूर्यचंद्रतारा ६
मंडलेषु निक्षिप्य तत्र बालयौवनप्रौढचिद्रूपां देवीं ध्यात्वा ॐ श्रीं ॐ सुभगायै इत्यादि

प्रातःकाले । ह्रीं क्लीं ॐ सुभगायै इत्यादि मध्याह्नकाले । स्वाहा ॐ सुभगायै इत्यादि सायंकाले ॥
सर्वमुच्चार्य ॐ सुभगायै इत्याद्यर्धरात्रसमये । इति स्वस्वगायत्र्या मूलदेव्यै अर्घ्यं दत्वा । य
थाशक्ति स्वस्वगायत्रीं जप्त्वा पुनर्मूलगायत्रीं अष्टोत्तरशतवारं जप्त्वा प्राणायामऋष्यादि
करषडंगन्यासान्विधाय । यथाशक्ति स्वमूलमंत्रं च जप्त्वा पुनः स्वस्वबीजाक्षरं स्वस्वध्या
नसहितं जप्त्वा गुरुं ध्यात्वा । पुनः प्राणायामादि विधाय बाह्यसूर्यमंडलान्मूलदेवीमानी
य स्वहृदि सूर्यमंडले संयोज्य ततः कल्पितस्वस्वसंध्योक्तरूपं स्वस्वस्थाने संस्थाप्य । जपं
तेजोरूपं देवीवामहस्ते समर्पयेदिति संध्याविधिः । इति संध्याचतुष्टयं कृत्वा देवीरूपः
साधकः स्यात् । अकृत्वा कर्मसिद्धिभाग्भवेत् । तस्मादावश्यकं संध्याचतुष्टयं कार्यं । अ
थवा केवलं प्रातःसंध्यामेव कुर्यात् प्रातःसंध्यां न परित्यजेत् भ्रष्टो भवतीति

भवानी.प.
७

शिवश्चासनानुारत्यं संध्यां कृत्वा तर्पणमारभेत। प्राणायाममृष्यादिकरषडंगन्यासान्वि
धायाचम्य। जलमध्ये मूलेनाष्टतमुद्रयाऽमृतीकृत्य। तत्र पूर्ववत्तीर्थमावाह्य तत्र ज
ले यंत्रं ध्यात्वा षडंगयोगेन सकलीकृत्य कुंडलिन्याः प्रयोगेण चामृतेनाभिषिच्य वि
धिवत्संपूज्य। ॐ ऐं ह्रीं श्रीं अमुकानंदनाथभैरवस्तर्पयतामिति ऐशान्यां दिशि स्वगु
रुं तर्पयेत्। ॥ शिवानंदनाथभैरवस्तर्पयतां। इत्याग्नेय्यां दिशि परमगुरुं तर्पयेत्। ॥ श्री
देव्यंबाभैरवी श्रीपादुकां तर्पयतामिति नैर्ऋत्यां परमाचार्यं तर्पयेत्। त्रिः सकृद्वा तर्प
णं। ततो जले यंत्रं विभाव्य तत्र देवीमावाह्य श्रीसदाशिवसहितं श्रीत्रिपुरभैरवि भवानि
मातस्तर्पयतामिति मूलदेवीमध्ये त्रिः संतर्पयेत्। ततः प्राणायाममृष्यादिकरषडंग
न्यासान्विधाय देवीं स्वहृदि स्थापयित्वा तीर्थं स्वस्थाने संस्थाप्य। ततः स्तोत्रादिकं प १

ठेत्पवामो नीकुलगृहं प्रविशेत्। कुलगृहं प्रविश्य हस्तपादौ प्रक्षाल्याचम्यार्घ्यादिना द्वारदेवता
पूजनं कुर्यात्। द्वारोर्ध्वे गं गणपतये नमः। दक्षिणे वं वटुकाय नमः। वामे क्षं क्षेत्रपालाय न
मः। अधः यां योगिनीभ्यः स्वाहा। एवं गं गंगायै। यं यमुनायै। श्रीं श्रियै। ऐं सरस्वत्यै। इति पूर्वा
दि चतुष्टये संपूज्य वामांगसंकोचेन पूजामंडपांतर्गत्वा। नैर्ऋत्यां ब्रह्मणे नमः। वास्तुपुरुषाय
नमः। इति जलादिना संपूज्य। ॐ सर्वविघ्नानुत्सारय हुं फट् स्वाहा। इति सिद्धार्थाक्षततिलैः भूता
पसर्पणं कृत्वा। जलेन भूमिशोधनं। ततः पवित्रवज्रभूमे हुं फट् स्वाहा। अनेन भूमिमभिमंत्र्य
मुष्टिनिःसृतजलेन भुवः आराधनं कृत्वाऽसनं स्थापयेत्। अथ भूमौ त्रिकोणमंडलं कृत्वा। त
त्राधारशक्तिभ्यो नमः। इति मंत्रेण कंबलाद्यासनं संस्थाप्य तदुपरि शवरूपकुशविष्टरं दत्वा
कृतांजलिः पठेत्। अस्य श्री आसनमंत्रस्य मेरुपृष्ठ ऋषिः। सुतलं छंदः। कूर्मो देवता। आसने

भवानीप॰
८

प्रवेशने विनियोगः। इति पठित्वा। यथाविधि विन्यसेत्। मेरुपृष्ठ ऋषये नमः शिरसि। सुतलं
छंदसे नमो मुखे। कूर्मो देवतायै नमो हृदि। इति न्यासं कृत्वा आसनोपरि कुशत्रयं दत्वा। ह्रीं आधा
रशक्ति कमलासनाय नमः। इति संपूज्य। आः सुरेखे वज्ररेखे हुं फट् स्वाहा। इति शिवासने मं
डलिकां कृत्वा। तदुपरि सिद्धासनाद्यासनेनोपविश्य। पृथ्वि त्वया धृता लोका देवि त्वं विष्णु
ना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनं। इति देव्या आज्ञां प्रार्थयित्वा यथामंत्रका
मेश्वरं संविदं वा स्वीकुर्यात्। तद्विधिर्यथा। संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे। ब्राह्म
णानां च तृप्त्यर्थं पवित्रा भव सर्वदा। ॐ ब्राह्मण्यै नमः स्वाहा। सिद्धमूलक्षत्रिये देवि हीनबोध
प्रबोधिनि। राजाप्रजावशंकरि शत्रुपक्षनिषूदनि। ऐं क्षत्रियायै नमः स्वाहा। आज्ञाने धनदी
प्तागे ज्ञानाग्नि ब्रह्मरूपिणि। आनंदस्याहुतिं प्रीतिं सम्यक् ज्ञानं प्रयच्छ मे। ह्रीं वैश्यायै न ८

मः स्वाहा। इत्यभिमंत्र्य। ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षयाकर्षय सिद्धिं
देहि अमुकपदं मे वशमानय स्वाहेति। तदुपरि सप्तधा मूलं च जप्त्वा धेनुमुद्रयामृतीकृत्य
आवाहनादिमुद्राः संदर्श्य। छोटिकाभिर्दशदिग्बंधं विधाय। ऐं वद वद वाग्वादिनि मम
जिह्वाग्रे स्थिरीभव सर्वसत्ववशंकरि स्वाहा। इत्यनेन मुखे जुहुयात्। ततः आनंदमयो
भूत्वा। वामकर्णोर्ध्वे गुं गुरुभ्यो नमः। दक्षकर्णोर्ध्वे गं गणपतये नमः। मध्ये इष्टदेव्यै न
मः। ततः स्वमंत्रेण सकलमभ्युक्ष्य। अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः। ये भूता विघ्न
कर्तारस्ते नश्यंतु शिवाज्ञया। पाखंडकारिणो भूत्वा भूता भूम्यंतरिक्षगाः। दिव्यलोकग
ता ये च ते नश्यंतु शिवाज्ञया। इति मंत्रं पठित्वा वामपार्ष्णिघातेन तर्जनीमध्यमाभ्यामू
र्ध्वोर्ध्वतालत्रयदानेन तर्जनीमध्यमांगुलिस्फोटेन दिव्यदृष्ट्या च सर्वान्विघ्नान्नि

भवानी·प·
११

रस्य चतुर्दिक्षु वह्निप्राकारं विचिंत्य। पूर्ववत्प्राणायामत्रयं कुर्यात्। ततो भूतशुद्धिं कुर्यात्। य
मिति वायुमंत्रं षोडशवारमुच्चरन् वामनासापुटेन पवनं रेचयेत्। वामकुक्षिस्थितं कज्ज
लप्रभं। ब्रह्महत्याशिरस्कं धं स्वर्णस्तेयभुजद्वयं। सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं। तत्
संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं। उपपातकरोमाणं रक्तश्मश्रुविलोचनं। खड्गचर्मधरं कु
द्धं कुक्षौ पापं विचिंतयेत्। एवं पापपुरुषं विचिंत्य नाभिमंडलस्थाग्निज्वालया तमेव पापपु
रुषं भस्मीभूतं भावयेत्। वमिति सुधाबीजं चतुःषष्टिवारमुच्चरन् पवनं कुंभयन् अधो
मुखीभूतसहस्रदलकमलकर्णिकांतर्गतचंद्रामृतधारया स्वात्मानं प्लुतं भावयेत्। ल
मिति पृथ्वीमंत्रं षोडशवारमुच्चरन् पवनं रोधयन् देहं दृढं कुर्यात्। ह्रीमिति भुवनेश्वरी
बीजं षोडशवारमुच्चरन् सर्वदेहगतमैश्वरं तेजो भावयेदिति भूतशुद्धिः। इत्थं भूतशु ८

द्धिं कृत्वा निरस्तसकलकलुषं देवताराधनयोग्यं स्वशरीरं विभाव्य प्राणप्रतिष्ठां कुर्या
त्। अस्य श्रीप्राणप्रतिष्ठामंत्रस्य। ब्रह्मविष्णुशिवा ऋषयः। ऋग्यजुःसामानि छं
दांसि। जगत्प्राणरूपा देवता। प्राणप्रतिष्ठार्थे विनियोगः। इति प्रांजलिः पठित्वा। हृदि
हस्तं निधाय प्राणप्रतिष्ठां पठेत्। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षः हसौः स्हौः हं
सः सोहं श्रीत्रिपुरभैरव्या भवान्याः प्राणा इह प्राणाः ३२ जीव इह स्थितः। ३२ सर्वें
द्रियाणि इह स्थितानि। ३२। वाङ्मनस्त्वक्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं
चिरं तिष्ठंतु स्वाहा। इति प्राणप्रतिष्ठां कृत्वा। या भवानी सोहमिति भावयेत्। नाहम
स्मि न चान्योस्ति ध्येयं चात्र न विद्यते। आनंदपदसंलीनः मनः समरसीगतं। मुहूर्त्तमिव
लयं विभाव्य मातृकान्यासमारभेद्यथा। अस्य श्रीअंतर्मातृकान्यासस्य। ब्रह्मा

भवानी·प· ऋषिःगायत्रीछंदः।मातृकासरस्वतीदेवता।हलोबीजानि।स्वराःशक्तयः।अव्यक्तंकी
१० लकं।श्रीत्रिपुरभैरवीभवान्यंगत्वेनन्यासेविनियोगः।ब्रह्मऋषयेनमःशिरसि।गायत्री
छंदसेनमःमुखे।श्रीमातृकासरस्वतीदेवतायैनमःहृदि।हल्भ्योबीजेभ्योनमःगुह्ये।स्व
रेभ्यःशक्तिभ्योनमःपादयोः।अव्यक्तकीलकायनमःमुखे।श्रीमांतृंकांसरस्वंतीदेवंतां
नाम्नो।ममश्रीत्रिपुरभैरवीभवान्यंगत्वेनन्यासेविनियोगःसर्वांगे।इतिसम्यक्त्वाकरष
डंगन्यासौकुर्यात्।ॐ ऐं ह्रीं श्रीं अं कं खं गं घं ङं आं हृदयायनमः।अंगुष्ठयोः।४ इं चं छं जं
झं ञं ईं शिरसेस्वाहा।तर्जन्योः।४ उं टं ठं डं ढं णं ऊं शिखायैवषट्।मध्यमयोः।४ एं तं थं दं धं
नं ऐं कवचायहुं।अनामिकयोः।४ ओं पं फं बं भं मं औं नेत्रत्रयायवौषट्।कनिष्ठयोः।४ अं
यं रं लं वं शं षं सं हं लं क्षं अः अस्त्रायफट्।करतलकरपृष्ठयोः।इतिकरषडंगन्यासंकृ १०

त्वामातृकांध्यायेत्।ॐ पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशांभास्वत्
कपर्दाकलितशशिकलामिंदुकुंदावदातां।अक्षस्रक्कुंभचिंतालिखितवरकरां।त्रीक्ष
णांपद्मसंस्थामच्छाकल्पामतुच्छस्तनजघनभरांभारतीतांनमामि।४ अंनमः।४ आं
ष ऋ६४ ।४ इं।४ ईं।४ उं।४ ऊं।४ ऋं।४ ॠं।४ लृं।४ ॡं।४ एं।४ ऐं।४ ओं।४ औं।४ अं।४ अः नमःइतिकंठे
षोडशदलेन्यसेत्।४ कं खं गं घं ङं चं छं जं झं ञं टं ठं नमःवक्षसिद्वादशदलकमले
।४ डं नमःएवं ढं णं तं थं दं धं नं पं फं नाभौदशदलकमले।४ बं भं मं यं रं लं [illegible] नमःलिंगमूलेष
ड्दलकमले।४ वं नमःएवं शं षं सं नमः।मूलाधारेचतुर्दलकमले।४ हं नमः ४ क्षं नमः।भ्रू
मध्येद्विदलकमले।इत्यंतर्मातृकान्यासः।अस्यश्रीबहिर्मातृकान्यासस्यइत्यादिऋ
ष्यादिकरषडंगन्यासध्यानानिअंतर्मातृकावत्कार्याणि।ततोन्यासंकुर्यात्।४ अं

भवानी·प· नमः शिरसि।४ आं नमो मुखवृत्ते।४ इं नमः दक्षनेत्रे।४ ईं नमः वामनेत्रे।४ उं नमः दक्षकर्णे
११ ।४ ऊं नमः वामे।४ ऋं नमः दक्षनासापुटे।४ ॠं नमः वामे।४ ऌं नमः दक्षगंडे।४ ॡं नमः वामे।४ एं
नमः ऊर्ध्वोष्ठे।४ ऐं नमः अधरोष्ठे।४ ओं नमः ऊर्ध्वदंतपंक्तौ।४ औं नमः अधोदंतपंक्तौ
।४ अं नमः शिरसि।४ अः नमः मुखे।४ कं नमः।४ खं नमः।४ गं नमः ४ घं।४ ङं नमः दक्षिणबा
हुसंधिपंचके।४ चं नमः ४ छं नमः ४ जं नमः ४ झं नमः ४ ञं नमः वामबाहुसंधिपंचके।४
टं नमः ४ ठं नमः ४ डं नमः ४ ढं नमः णं नमः दक्षपादसंधिपंचके।४ तं नमः ४ थं नमः दं न
मः।४ धं नमः।४ नं नमः वामपादसंधिपंचके।४ पं नमः दक्षपार्श्वे।४ फं नमः वामपार्श्वे
बं नमः पृष्ठे।४ भं नमः ४ मं नमः उदरे।४ यं त्वगात्मनेनमः हृदि।४ रं असृगात्मनेनमः द
क्षांसे।४ लं मांसात्मनेनमः ककुदि।४ वं मेदआत्मनेनमः वामांसे ४ शं अस्थ्यात्मनेनमः ११

नाभौ २

हृदादिदक्षकरे।४ षं मज्जात्मनेनमः हृदादिवामकरे।४ सं शुक्रात्मनेनमः हृदादिद
क्षपादे।४ हं प्राणात्मनेनमः हृदादिवामपादे।४ ळं जीवात्मनेनमः हृदादिपादांतं।४ क्षं
परमात्मनेनमः हृदादिशिरसि। इत्थं बहिर्मातृकां विन्यस्य पंखलान्यासमारभेद्य
था। शिरसि ॐ श्रीं नमः। चिबुके ह्रीं क्लीं नमः। मुखे स्वाहा नमः। मुखे ॐ श्रीं नमः। कं
ठे ॐ श्रीं नमः। कंठे ह्रीं क्लीं नमः। चिबुके स्वाहा नमः। चिबुके ॐ श्रीं नमः। हृदये ह्रीं क्लीं
नमः। कंठे स्वाहा नमः। कंठे ॐ श्रीं नमः। नाभौ ह्रीं क्लीं नमः। हृदये स्वाहा नमः। हृः
श्रीं नमः। स्वाधिष्ठाने ह्रीं क्लीं नमः। नाभौ स्वाहा नमः। नाभौ ॐ श्रीं नमः। मूले ह्रीं क्लीं
स्वाधिष्ठाने स्वाहा नमः। स्वाधिष्ठाने ॐ श्रीं नमः। ऊरौ ह्रीं क्लीं नमः। मूले स्वाहा न
ॐ श्रीं नमः। जानौ ह्रीं क्लीं नमः। ऊरौ स्वाहा नमः। ऊरौ ॐ श्रीं नमः। पादे ह्रीं क्लीं नमः। जा

भवानी प॰
१२
नुनिस्वाहा। नमः। ततः स्वशरीरे पीठं न्यसेत्। मूलाधारे ४ आधारशक्त्यै नमः। ऊपर्युपरि ४
प्रकृत्यै नमः ४ कमठाय नमः ४ शेषाय नमः। पद्माय नमः ४ पृथिव्यै नमः ४ सुधांबुधये नमः
४ मणिद्वीपाय नमः ४ चिंतामणिगृहाय ४ श्मशानाय ४ पारिजाताय ४ तन्मूले ४ रत्नवेदि-
कायै तस्योपरि ४ मणिपीठाय दिक्षु ४ नानामुनिगणेभ्यो नमः ४ नानादेवेभ्यो नमः ४ शि-
वमुंडचितांगारास्थिभ्यो नमः दक्षांसे ४ धर्माय वामांसे ४ ज्ञानाय नमः वामोरौ ४ वैरा-
ग्याय नमः दक्षोरौ ४ ऐश्वर्याय नमः। मुखे ४ अधर्माय नमः। वामपार्श्वे ४ अज्ञानाय
नमः। नाभौ ४ अवैराग्याय नमः। दक्षपार्श्वे ४ अनैश्वर्याय नमः। हृदि ४ शेषाय नमः।
तदुपरि ४ पद्माय नमः। तत्रैव ४ आनंदकंदाय नमः ४ संविन्नालाय नमः। ४ प्रकृतिमयपत्रे-
भ्यो नमः। ४ विकृतिमयकेसरेभ्यो नमः ४ पंचाशद्वर्णबीजाढ्यकर्णिकायै नमः। सर्वतत्त्व- १२

रूपायै कर्णिकायै नमः। तस्यामेव ४ अं अर्कमंडलाय नमः। ४ उं सोममंडलाय ४ मं वह्निमं-
डलाय ४ सं सत्त्वाय ४ रं रजसे ४ तं तमसे ४ आं आत्मने ४ अं अंतरात्मने ४ पं परमात्मने ४
ह्रीं ज्ञानात्मने ४ पद्माष्टदलेषु। ४ इच्छायै नमः। ज्ञानायै। क्रियायै। कामिन्यै। कामदायिन्यै।
रत्यै। रतिप्रियायै। आनंदायै। कर्णिकायां मनोन्मन्यै नमः। अग्न्यादिकोणेषु सेपरायै न-
मः। स्त्रपरायै नमः। विरूपायै मैने। ह्रीं सदाशिवमहाप्रेतपद्मासनाय नमः। इति पीठं
निजदेहे विन्यस्य बहिः स्वर्णादिसिंहासने पुनर्योतं संस्थाप्य पुष्पांजलिना छाद्यपूर्व-
वत्तत्रैव पुष्पादिना ध्यानेन वा पाठेन वा पीठन्यासक्रमेण संपूजयेत्। ततः स्ववामभागे
पुष्पकूटकादिना शालितंडुलादि विघ्नेन वा। षट्कोणं तद्गतत्रिकोणं तद्गतत्रिकोणं बिं-
दुं वा। होत्वन्नवतुरस्रं कृत्वा। सामान्यार्घोदकेनाभ्युक्ष्य तत्राधिपूर्ववत्पीठन्यासक्रमे-

भवानी·प·
१३

णसंपूज्य। ततो नमः स्याधारं प्रक्षाल्य। मंडलोपरि संस्थाप्य मं वह्निमंडलाय दशकलात्मने न
मः। इति संपूज्य। फडिति कलशं प्रक्षाल्य। हेतुना संपूर्य। रक्तवस्त्रमाल्यादिना संपूज्य। देवीबु
ध्या संस्थाप्य। अं अर्कमंडलाय द्वादशकलात्मने नमः। इति कलशं संपूज्य। उं चंद्रमंडलाय
षोडशकलात्मने नमः। इति हेतुं संपूज्य। फडिति संरक्ष्य हुमित्यवगुंठ्य। मूलेन गंधमानी
य कलशे पुष्पं दत्वा। ॐ बां बीं बूं वैं वौं वः ब्रह्मशापविमोचितायै सुधादेव्यै नमः। इति त्रिः पठि
त्वा। ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुधाकृष्णशापं मोचय अमृतं स्रावय स्रावय स्वाहा। इत्यपि
त्रिः। ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योम
सदब्जा गोजा ऋतजा अद्रिजा ऋतं। इत्यपि त्रिः। ततः आनंदभैरवं ध्यात्वा। ॐ ऐं ह्रीं श्रीं ह
सक्षमलवरयूं आनंदभैरवाय वौषट्। इति त्रिः संपूज्य। ॐ ऐं ह्रीं श्रीं सहक्षमलवरयूं सुरादे १३

[illegible] वषट्। इत्यानंदभैरवीं च संपूज्य। तन्मध्ये त्रिपंक्त्या दक्षावर्तेन अं १६ कं १६ थं १६ इति क्रमे
[illegible] लिखित्वा। तन्मध्ये हंसं विलिख्य। तत्र शिवशक्त्योः समावेशात्मकं तं विचिंत्य। धेनुमुद्रया मृ
[illegible] त्वा। मत्स्यमत्र बीजं मूलमष्टधा [illegible] जप्त्वा पठित्वा। आत्मश्रीचक्रयोर्मध्ये हुंकारे
[illegible] कोणषट्कोणवृत्तचतुरस्रं विलिख्य। चतुरस्रे ४ पूर्णगिरिपीठाय नमः ४ उड्डि
यानपीठाय नमः ४ कामरूपपीठाय नमः ४ जालंधरपीठाय नमः। इति संपूज्य [illegible]
[illegible] गं संपूज्य। मूलत्र्यंशं त्रयेण त्रिकोणं [illegible] दत्त्वा संपूज्य [illegible] अर्घ्याधारं [illegible]
[illegible] त्रिकोणगर्भषट्कोणं [illegible] पूजितां [illegible] संस्थाप्य [illegible] जलेन [illegible]
[illegible] वह्निमंडलाय दशकलात्मने नमः। इति संपूज्य। [illegible] मंत्रेण देवीं [illegible]
पात्रं प्रक्षाल्य त्रिपादिकोपरि संस्थाप्य। अं अर्कमंडलाय द्वादशकलात्मने नमः।

इति संपूज्य। [redacted] ततस्त्रिकोणं वृत्तषट्कोणं तन्मध्ये विलिख्य समस्तव्यस्तमंत्रेण संपूज्य। व
रुणबीजं मूलं विलोममातृकां च पठन् देहेनु नात्रिकोणं संपूज्य। जलेन भागमेकं च प्रपूर्य
तत्र दूर्वाक्षता गंधरक्तपुष्पबिल्वपत्रनानासुगंधद्रव्यं निक्षिप्य। कुंभमेव मंडलायषोडशकला
त्मनेनमः। इति संपूज्य पूर्ववन्मंत्रं विलिख्य त्रिकोणत्रिरेखायां। अं १६ कं १६ थं १६ इति
विलिख्य मूलखंडत्रयेण त्रिकोणं संपूज्य। षट्कोणे षडंगं च संपूज्य। ॐ गंगे च यमुने चैव
गोदावरि सरस्वति। नर्मदे सिंधुकावेरि जलेस्मिन् संनिधिं कुरु। इत्यंकुशमुद्रया सूर्यमंडलात्ती
र्थमावाह्य। आनंदभैरवभैरव्यौ तन्मंत्रेण संपूज्य। पूर्वादिदिक्चतुष्टये मध्ये च। ग्लूं गगनर
त्नेभ्यो नमः। स्लूं स्वर्गरत्नेभ्यो नमः। ह्लूं पातालरत्नेभ्यो नमः। म्लूं मर्त्यरत्नेभ्यो नमः। न्लूं नागरत्ने
भ्यो नमः। इति। ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्र

मणेष्वधिक्षियंति भुवनानि विश्वा। इति द्वितीयं। त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्द्धनं। उर्वा
रुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्। इति तृतीयं। ॐ तद्विष्णोः परमं पदं सदा पश्यंति सू
रयः। दिवीव चक्षुराततं। तद्विप्रासो विपन्यवो जागृवांसः समिंधते। विष्णोर्यत्परमं पदं। इ
ति चतुर्थी। ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु। आसिंचतु प्रजापतिर्धाता गर्भं
दधातु ते। गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति। गर्भं ते अश्विनौ देवावाधत्तां पुष्कर
स्रजौ। ॐ ऐं हंसः क्रों जुंसः अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय २ स्वाहा। ।
इति कुंडादिकं च संशोध्य। हे त्वं तरे निक्षिप्य सर्वं दुमित्य वगुंठ्यामृतमुद्रयामृतीकृत्य ता
लत्रयेण दशदिग्बंधं कृत्वा। तदुपरि मूलं सप्तधा संजप्य। मूलेनाभिमंत्र्य। तत्र देवीमावा
ह्य। तालत्रयदिग्बंधं कृत्वा वगुंठ्यामृतीकृत्य योनिं प्रदर्श्य। षडंगेन सकलीकृत्य म

भवानी॰प॰ त्यमुद्रयाऽर्घपात्रमाछाद्य मूलं दशधा जप्त्वा देवीस्वरूपं विभाव्य। देव्या आज्ञां गृहीत्वा घटश्री
१५ पात्रयोर्मध्ये गुरुशक्तियोगिनीबलिस्थापाद्यार्घ्याचमनीयपात्राणि तथैव संस्थाप्य संपू
ज्य आनंदभैरवभैरव्यौ स्वस्वमंत्रेण त्रिः संतर्प्य स्वगुरुं च स्वशक्तिसहितं त्रिः संतर्प्य। परमगु
रुपरमाचार्यपरमेष्ठिगुरूंश्च संतर्प्य। प्राणापानव्यानोदानसमाना मे शुध्यंतां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा। ॐ पृथिव्यप्तेजोवाय्वाकाशादि मे इत्यादि।२। ॐ प्रकृत्यहंका
रबुद्धिमनःश्रोत्राणि मे इत्यादि॥३॥ ॐ त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे इत्या॥४॥ ॐ पाणि
पादपायूपस्थशब्दा मे इत्यादि।५। ॐ [redacted] स्पर्शरसरूपगंधाकाशा इत्यादि।६।
ॐ वायुतेजःसलिलभूम्यात्मानो मे इत्यादि इति तत्वशुद्धिं विधाय। स्वमंडलादि दुं[illegible] स्त्य॥
मूलेन श्रीमंडलमंत्रेणात्मानं पूजोपकरणं च प्रोक्ष्य। ततः पूर्वाः [illegible]मभ्यर्चयेद्यथा॥ त १५

त्रादौ यंत्रं पीठोपरि संस्थाप्य पीठन्यासं कुर्यात्। आधारशक्त्यै नमः। प्रकृत्यै नमः। कमठाय न
मः। शेषाय। पद्माय। पृथिव्यै। सुधांबुधये। मणिद्वीपाय। चिंतामणिगृहाय। श्मशानाय।
पारिजाताय। तन्मूले रत्नवेदिकायै। तस्या उपरि मणिपीठाय। दिक्षु नानामुनिगणेभ्यः। नाना
देवेभ्यो नमः। शवमुंडचितांगारास्थिभ्यो नमः। धर्माय। अधर्माय। ज्ञानाय। अज्ञानाय। वै
राग्याय। अवैराग्याय। ऐश्वर्याय। अनैश्वर्याय। शेषाय। पद्माय। आनंदकंदाय। संवि
न्नालाय। प्रकृतिमयपत्रेभ्यः। विकारमयकेसरेभ्यः। पंचाशद्वर्णबीजाढ्यकर्णिकायै।
तस्यामेव अं अर्कमंडलाय। उं सोममंडलाय। मं वह्निमंडलाय। सं सत्वाय। रं रजसे। तं तम
से। आं आत्मने। अं अंतरात्मने। पं परमात्मने। ह्रीं ज्ञानात्मने नमः। पद्मस्य पत्रेषु। इच्छा
यै। ज्ञानायै। क्रियायै। कामिन्यै। कामदायिन्यै। रत्यै। रतिप्रियायै। आनंदायै। इति पे

त्रेषु। मध्ये कर्णिकायां। त्रिकोणकोणत्रये। ऐं परायै। अपरायै। विरूपायै। ह्सौः सदाशिव
महाप्रेतपद्मासनाय नमः। इति पीठमभ्यर्च्य। तदुपरि चक्रं संस्थाप्य। चक्रस्य पूर्वे वां [illegible]काय।
दक्षिणे यां योगिनीभ्यः। पश्चिमे क्षां क्षेत्रपालाय नमः। उत्तरे गां गणपतये नमः। इति बल्यादि
नाः संपूज्य। पूर्ववत् षडंगं विधाय। पूर्वोक्तरूपां देवीं ध्यात्वा। यंत्रमध्ये। देवेशि भक्तिसुल
परिवारसमन्विते। यावत्त्वां पूजयिष्यामि तावद्देवि इहावह। इत्यनेन यंत्रमध्ये देवीं संस्था
प्य। श्रीसदाशिवसहिते भवानि त्रिपुरभैरवि इहागच्छ २।१।१। इह तिष्ठ २।१।१। इह सन्निहि
ता भव। २।१।१। इह सन्निरुद्धा भव २।१।१ मम पूजां गृहाण २। इत्यावाह्य। पूर्ववत् प्राणप्रतिष्ठां
लेलिहानमुद्रया यंत्रमध्ये विधाय। हुमित्यवगुंठ्य। सकलीकृत्य। परमीकृत्य। छोटिका
भिर्दशदिग्बंधं विधाय। अमृतयोनिखड्गशक्तिवराभयमुद्राः प्रदर्श्य। [illegible] ह्रां तमूलं

ते श्रीसदाशिवसहितां त्रिपुरभैरवीं तर्पयामि इति त्रिः [illegible] तर्प्य। [illegible] मूलांते। श्रीसदाशिव
स[illegible]ते त्रिपुरभैरवीभवान्यै नमः। पादयोः पाद्यं। एवमर्घ्यं। स्वाहा शिरसि। आचमनीयं म
धुपर्कं च स्वधा। मुखे। स्नानीयं नमः सर्वांगे। गंधं नमः। पुष्पाणि वौषट्। धूपपात्रं पूजितधू
पं निवेदयामीति। जगद्ध्वनिमंत्रमातः स्वाहेति। पूजितं [illegible] घंटां वादयन्। गायत्रीमूलमंत्रं च
पठित्वा। धूपं। एवं दीपं। एवं नैवेद्यं धेनुमुद्रयामृतीकृतं [illegible] निवेद्य। पुनराच
मनीयं तांबूलं च दत्वा। त्रिः संतर्प्य। योनिमुद्रादिकं प्रदर्श्य। [illegible] श्रीत्रिपुरभैरवि
आवरणं ते पूजयामीत्याज्ञां गृहीत्वा। वायव्यादीशपर्यंतं [illegible] नंदनाथश्रीपादुकां
पूजयामीति। एवं परमगुरुं। परमाचार्यं। परमेष्ठिगुरुं [illegible] इति पूजयित्वा तर्पयित्वा तद
धः दिव्यौघश्री। सिद्धौघश्री। मानवौघश्री। इति पूजने तर्पयेच्च। ततस्त्रिकोणे वाग्रको
णे। भेरुंडश्रीपादुं। द्वितीयकोणे। चंडीश्री। तृतीये। पांचा[illegible]श्री। इति पूजयेत् तर्पयेच्च। ततः ष

भवानी·प· ट कोणे स्वाग्रकोणमारभ्य वामावर्त्तेन हृदयश्री॥ शिरःश्री॥ शिखाश्री॥ कवचश्री॥ नेत्रश्री॥ अस्त्रश्री॥ इति
११ पूजयेत्तर्पयेच्च॥ ततोष्ट दलेषु स्वाग्रदलमारभ्य। स्ववामावर्त्तेन। महाविद्याश्री। जगन्माताश्री॥ महालक्ष्मी
श्री॥ शिवप्रियाश्री॥ कुलविद्याश्री॥ पार्वतीश्री॥ मुंडकराश्री॥ त्रिपुरभैरवीश्री॥ इति पूजयेत्तर्पयेच्च॥ ततोव
ते इंद्रश्री॥ अग्निश्री॥ यमश्री॥ निर्ऋतिश्री॥ वरुणश्री॥ वायुश्री॥ कुबेरश्री॥ ईशानश्री॥ इति दिग्विदिक्षु इंद्रे
शानयोर्मध्ये ब्रह्मश्री॥ निर्ऋतिवरुणयोर्मध्ये विष्णुश्री॥ इति पूजयेत्तर्पयेच्च॥ तत्स्वनुरस्ते। वज्रश्री॥ शक्तिश्री॥
दंडश्री॥ खड्गश्री॥ पाशश्री॥ अंकुशश्री॥ गदाश्री॥ त्रिशूलश्री॥ पद्मश्री॥ चक्रश्री॥ इति पूजयेत्तर्पयेच्च॥ ततो दे
वीसमीपे खड्गश्री॥ वामेशक्तिश्री॥ तदधः वरश्री॥ अभयश्री॥ इति संपूज्य संतर्प्य। पुनरपि बिंदौ। पूर्ववद्देवीं संपू
ज्य। धूपादिकं तथैव दत्वा। नैवेद्यादिना संतोष्य। शक्तौ बलिदानादि विधाय। गुरुं शिरसि। कुंडलिनीं मूला
धारे। स्वहृदि मूलदेवीं ध्यायन् प्राणायामं ऋष्यादि कर षडंग न्यासान् विधाय। गुह्याति गुह्य गोप्त्री त्वं गृहा
णास्मत्कृतं जपं। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि। इति जपं समर्प्य। कवच सहस्रनाम स्तोत्रा
दिकं पठित्वा। सामयिकैः सार्द्धं पात्रवंदनादि विधाय। श्री देवीं स्वहृदि विसर्ज्य सुखं विहरेदिति शि ११
वं॥ ॥इति त्रिपुरा भवानी पद्धतिः समाप्ता॥ लिखितं देवो[illegible]रणा काश्यां संवत १७६७॥
२६ पुस्तकं यथा म[illegible] नस नाम जो [illegible] तस तस्य दं [illegible] श्री गुरुनाथ मार्गशीर्ष सुदि १५ [illegible]नो